[२९१] '[1]दॄ भये' (धा.पा. ८०९) इत्यस्य ह्रस्वश्च द्वे च। (म. भा. २.१३६)

ददृत्।

[२९२] ध्यायतेः सम्प्रसारणं च[2]। (म.भा. २.१३६)

धीः॥

## भुवः सञ्ज्ञान्तरयोः। (१७९/३१५९)

[3]भवतेर्धातोः सञ्ज्ञायामन्तरे च [4]गम्यमाने क्विप् प्रत्ययो भवति। [5]विभूर्नाम कश्चित्। अन्तरे– प्रतिभूः। धनिकाधमर्णयोरन्तरे यस्तिष्ठति स प्रतिभू[6]रुच्यते॥

## विप्रसम्भ्यो ड्वसञ्ज्ञायाम्। (१८०/३१६०)

भुवः [7]इति वर्तते। वि प्र सम् इत्येवंपूर्वाद् भवतेर्धातोः डुप्रत्ययो भवति, न चेत् सञ्ज्ञा गम्यते। विभुः सर्वगतः। प्रभुः स्वामी। सम्भुः जनिता। असञ्ज्ञायाम् इति किम्? विभूर्नाम कश्चित्।

[२९३] डुप्रकरणे [8]मितद्र्वादिभ्य उपसङ्ख्यानम्। (म. भा. २. १३६)

मितं द्रवति मितद्रुः। शम्भुः[9]॥

## धः कर्मणि ष्ट्रन्। (१८१/३१६१)

धयतेर्दधातेश्च[10] कर्मणि कारके ष्ट्रन् प्रत्ययः भवति। षकारो ङीषर्थः। धयन्ति तां दधति वा भैषज्यार्थम् इति धात्री। स्तनदायिनी आमलकी च उच्यते॥

## दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। (१८२/३१६२)

'दाप् लवने' (धा. पा. १०६०), 'णीञ् प्रापणे' (धा. पा. ९०२), 'शसु हिंसायाम्'[11] (धा. पा. ७२७), 'यु मिश्रणे' (धा. पा. १०३४), 'युजिर् योगे' (धा. पा. १४४५), 'ष्टुञ् स्तुतौ' (धा. पा. १०४४), 'तुद व्यथने' (धा. पा. १२८२), 'षिञ् बन्धने' (धा. पा. १२४९), 'षिचिर् क्षरणे' (धा. पा. १४३५), 'मिह सेचने (धा. पा. ९९३), 'पत्लृ गतौ' (धा. पा. ८४६), 'दंश दशने' (धा. पा. ९९०), 'णह बन्धने' (धा. पा. ११६७), [12]एतेभ्यो धातुभ्यः करणे कारके [13]ष्ट्रन् प्रत्ययो भवति। [14]दाति अनेन इति दात्रम्। [15]नेत्रम्। शस्त्रम्। योत्रम्। योक्त्रम्। स्तोत्रम्। तोत्त्रम्। सेत्रम्। सेक्त्रम्। मेढ्रम्। पत्रम्। दंष्ट्रा। अजादित्वात् टाप्, न ङीप्। दंशेरनुनासिक[16]लोपेन निर्देशो ज्ञापनार्थः, क्ङितोऽन्यस्मिन्नपि प्रत्यये नलोपः [17]क्वचिद् भवति इति। तेन ल्युटचपि भवति। [18]दशनम्। [19]नद्ध्री॥

1. दृणातेर्ह्रस्वत्वं द्वे च फ. 2. च नास्ति ब. 3. तच्छीलादिषु कर्तृषु इति निवृत्तम् इत्यधिकम् ब. 4. वर्तमाने फ. 5. मित्रभूः अ. ब. ड. 6. इति इत्यधिकम् फ. ह. 7. इति किम् ह. 8. मितद्र्वादीनाम् ह. 9. पांसुः इत्यधिकम् ब, आकृतिगणः इत्यधिकम् ड. 10. धातोः सञ्ज्ञायां विषये इत्यधिकम् फ. 11. शंसु स्तुतौ च द्वयोरपि ग्रहणम् इत्यधिकम् ब. 12. एभ्यो ह. 13. ष्टुन् ह. 14. दीयते अ. 15. नयन्ति तेन नेत्रम् ब. 16. लोपनिर्देशः ब, निर्देशः नास्ति फ. 17. क्वचित् नास्ति ब. 18. ष्ट्रन्नर्थं तु निपातनम् न भवति। शुनो दन्तः दंष्ट्रा इति निर्देशात् इत्यधिकम् ड. 19. नद्ध्री नास्ति ब. ह.